## स्थालीबिलात्। (७०/१७३४)

छयतौ अनुवर्तेते। स्थालीबिलशब्दाच् छयतौ प्रत्ययौ भवतः तदर्हति इत्यस्मि[1]न्नर्थे। ठको[2]ऽपवादौ। स्थालीबिमलर्हन्ति स्थालीबिलीयाः तण्डुलाः, स्थालीबिल्याः। पाकयोग्याः इत्यर्थः[3] ॥

## यज्ञर्त्विग्भ्यां घखञौ। (७१/१७३५)

यज्ञशब्दाद् ऋत्विक्शब्दाच्च यथासङ्ख्यं घखञौ प्रत्ययौ भवतः तदर्हति इत्यस्मिन् [4]विषये। [5]ठकोऽपवादौ। [6]यज्ञियो ब्राह्मणः। [7]आर्त्विजीनो ब्राह्मणः।

[५१९] यज्ञर्त्विग्भ्यां तत्कर्मार्हतीत्युपसङ्ख्यानम्। (म. भा. २.३५७)

यज्ञकर्म अर्हति यज्ञियो देशः। [8]ऋत्विक्कर्म अर्हति आर्त्विजीनं ब्राह्मणकुलम्। आर्हीयाणां ठगादीनां पूर्णो[9]ऽवधिः। अतः परं प्राग्वतीयः ठञेव भवति ॥

## पारायणतुरायणचान्द्रायणं वर्तयति। (७२/१७३६)

समर्थविभक्तिरनुवर्तते। अर्हति इति निवृत्तम्। पारायणादिभ्यो द्वितीयासमर्थेभ्यः वर्तयति इत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। पारायणं वर्तयति अधीते पारायणिकश्छात्रः। [10]तौरायणिको यजमानः। [11]चान्द्रायणिकस्तपस्वी[12] ॥

## संशयमापन्नः। (७३/१७३७)

संशयशब्दाद् द्वितीयासमर्थात् आपन्नः इत्येतस्मिन्नर्थे ठञ् प्रत्ययो भवति। संशयमापन्नः प्राप्तः सांशयिकः स्थाणुः[13] ॥

## योजनं गच्छति। (७४/१७३८)

योजनशब्दात् द्वितीयासमर्थाद् गच्छति इत्यस्मिन्नर्थे ठञ् प्रत्ययो भवति। योजनं गच्छति यौजनिकः।

[५२०] क्रोशशतयोजनशतयोरुपसङ्ख्यानम्। (म. भा. २.३५८)

क्रोशशतं गच्छति क्रौशशतिकः। यौजनशतिकः।

[५२१] ततोऽभिगमनमर्हतीति च क्रोशशतयोजनशतयोरुपसङ्ख्यानम्। (म. भा. २.३५८)

क्रोशशताद[14]भिगमनमर्हति क्रौशशतिको भिक्षुः। यौजनशतिक [15]आचार्यः ॥

---

1. विषये ह. फ. 2. अपवादः ग. 3. निष्फलीकृतत्वात् इत्यधिकम् ह. 4. अर्थे फ. 5. ठकोऽपवादः क. 6. यज्ञमर्हति इत्यधिकम् ह, यज्ञियो महेन्द्रः क. 7. ऋत्वीजीनो ब्राह्मणः ह. 8. एतद्वाक्यं नास्ति फ. 9. विधिः ब. ग. 10. तुरायणं यज्ञं वर्तयति इत्यधिकम् ह, तुरायणं वर्तयति इत्यधिकम् फ. 11. चान्द्रायणं वर्तयति इत्यधिकम् ग. ह, समापयति इत्यर्थः इत्यधिकम् ग. 12. प्राग्वतीयेषु संख्यापूर्वाणामपि इष्टम्, द्वैपारायणिकः इत्यधिकम् ग. 13. संशयविषयीभूतः इत्यर्थः इत्यधिकम् ग. 14. विगमनम् क. 15. भिक्षुः कः गुरुः इति महाभाष्यपाठः